[illegible]

# वाक्यार्थज्योतिः
# Vakyārthajyotiḥ

अङ्कः – 2 वर्षः – 2015-16

प्रधानसम्पादकः

प्रो. अर्कनाथचौधरी

सम्पादकौ

डॉ. पङ्कजकुमारः रावलः

डॉ. शत्रुघ्नपाणिग्राही

श्रीसोमनाथसंस्कृतयुनिवर्सिटी
वेरावलम्

Scanned with CamScanner

Shree Somnath Sanskrit University Grantha Series - 10

# VĀKYĀRTHAJYOTIḤ

Issue - 2 Year - 2015-16

Chief Editor
**Pro. Ark Nath Chaudhary**
Vice-Chancellor
Shree Somnath Sanskrit University, Veraval

Editors
**Dr. Pankajkumar Rawal**
**Dr. Satrughna Panigrahi**

**Shree Somnath Sanskrit University - Veraval - Gujarat**

Scanned with CamScanner

# विषयानुक्रमणिका


१ विध्यादयोऽर्थाः लिङः वाच्याः द्योत्या वा ०१-०३

प्रो. अर्कनाथचौधरी

२ यज्ञानां वैज्ञानिकता ०४-१२

प्रो. लम्बोदरमिश्रः

३ चिकित्साक्षेत्रे ज्यौतिषस्य योगदानम् १३-२७

प्रो. वासुदेवशर्मा

४ ग्रहाणां बलवैविध्यम् २८-४७

प्रो. हंसधरझा

५ वैदिकदेवशास्त्रम् ४८-५६

प्रो. देवेन्द्रनाथपाण्डेयः

६ काव्यदोषविमर्शः ५७-७१

डॉ. नरेन्द्रकुमारपण्ड्या

७ महाभाष्यस्य आलोके दृष्टप्रयोजनदृष्ट्या "न धातुलोप आर्धधातुके" सूत्रस्यानावश्यकत्वप्रतिपादनम् ७२-८३

प्रो. विनोदकुमारझा

८ रम्या रामायणी कथा ८४-९४

प्रो. महेन्द्रकुमारदवे

९ ध्वनिः, ध्वनिप्रपञ्चः, तत्प्रयोजनञ्च ९५-१०४

डॉ. ललितः पटेलः

१० पाठ्यन्ते पशुनिर्भराः १०५-१२०

डॉ. पङ्कजकुमारः रावलः


Scanned with CamScanner

२ डॉ. डायालाल एम्. मोकरिया-" संस्कृतसाहित्ये पित्रो: गौरवम् "

३ डॉ. अमृतलाल: भोगायता - " अनन्योक्तेरन्योक्तेरीपदास्वाद:"

४. चतुर्थाधिवेशनम् –

दिनाङ्क: - २१-०३-२०१६

अध्यक्ष: - प्रो. विनोदकुमार: झा

वाक्यार्थप्रस्तोतारो विषयाश्च -

१ प्रो. महेन्द्रकुमार: अं. दवे - "रम्या रामायणी कथा"

२ डॉ. ललित: पटेल: - "ध्वनि:, ध्वनिप्रपञ्च:, तत्प्रयोजनञ्च"

३ डॉ. बी. उमा महेश्वरी - "व्याप्तिस्वरूपविचार:"

५. पञ्चमाधिवेशनम्-

दिनाङ्क: - ०१-०४-२०१६

अध्यक्ष: - डॉ. नरेन्द्रकुमार: एल्. पण्ड्या

वाक्यार्थप्रस्तोतारो विषयाश्च -

१ डॉ. शत्रुघ्नपाणिग्राही - "मन्त्रार्थविचार:"

२ डॉ. रमेशचन्द्र बी. शुक्ल: - "ज्यौतिषशास्त्रे नवविधकालमानविचार:"

३ डॉ. कार्तिक: पण्ड्या - "डॉ. गोस्वामी बलभद्रप्रसाद शास्त्री कृत "इन्दिराजीवनम्" शतककाव्य का काव्यशास्त्रीय अध्ययन"

६. षष्ठाधिवेशनम् –

दिनाङ्क: - ०५-०४-२०१६

अध्यक्ष: - डॉ. नरेन्द्रकुमार: एल्. पण्ड्या

वाक्यार्थप्रस्तोतारो विषयाश्च -

Scanned with CamScanner

१ डॉ.नरेन्द्रकुमारः पण्ड्या - "काव्यदोषविमर्शः"

२ डॉ. पङ्कजकुमारः एस्. रावलः - "पाठ्यन्ते पशुभिर्नराः"

३ डॉ. रविन्द्रः एस्. काळे - "Copyrights in India : An Introduction"

२०१५-१६ तमे शैक्षणिकवर्षे श्रीसोमनाथसंस्कृतविश्वविद्यालये व्याख्यानमालाकार्यक्रमः समायोजितः । तत्र एते विद्वांसः व्याख्यानानि प्रदत्तवन्तः ।

१ प्रो. लम्बोदरमिश्रः - "यज्ञानां वैज्ञानिकता"

२ प्रो. हंसधरझा - "ग्रहाणां विविधं बलम्"

३ प्रो. वासुदेवशर्मा - "चिकित्साक्षेत्रे ज्यौतिषस्य योगदानम्"

एवं २०१५-१६ तमे शैक्षणिकवर्षे कुलपतीनामाशिभिः प्राध्यापकानां सहयोगेन च वाक्यार्थपरिषदः इदमपि वर्षं सर्वैः विद्यापुरुषैः सभाजितं संयोजकाभ्यां कार्तज्ञं विनिवेद्य देव्याः सरस्वत्याः चरणकमलयोः सधन्यवादं वाक्यार्थपुष्पं समर्पितम् ।

इत्थं समायोजकौ

डॉ. पङ्कजकुमारः रावलः

डॉ. शत्रुघ्नपाणिग्राही

Scanned with CamScanner

# पाठ्यन्ते पशुभिर्नराः

डॉ. पङ्कजकुमारः एस. रावलः, सहायकाचार्यः,पुराणविभागस्य
श्री सोमनाथ संस्कृत युनिवर्सिटी संचालित कोलेज, वेरावलम्

"ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे"[1] मार्कण्डेयपुराणस्य वचनानुसारं ईश्वरेण चतुर्धा या सृष्टि विरचिता स्वेदजा अण्डजा उद्भिजा जरायुजा च तासु सर्वासु ये जीवाः प्राणिनः सन्ति सर्वज्ञानमयाः सन्ति तत्प्रमाणयति व्यासवचनं मार्कण्डेयपुराणमिति।

सर्वेषु जीवेषु सर्वेषु प्राणिषु सर्वविधशरीरेषु मानवशरीरं कलेवरमुच्यते किन्तु तथापि ज्ञानं पक्षाधारेण शास्त्रं प्रमाणयति यत् मानवेनापि सुशिक्षासम्पन्नेन भाव्यं चेत् उदात्तोदारदृष्ट्या सर्वजीवेभ्यः यत्किमपि शिक्षाबोधादिग्रहणं कर्तव्यमिति।

अत्र प्रतिपाद्यविषयः वर्त्तते यत् मानव एव सर्वान् पाठयति बोधयति शिक्षयति प्रेरयति प्रचोदयति तथा नास्ति भगवता सृष्टिनिर्माणं कृतं चेत् यत्किमपि निर्मितं रचितं प्रादुर्भूतं सर्वेषु यत्किमपि तादृशं स्थापितं येन बोधग्रहणं शिक्षाग्रहणं च भवेत्। तदर्थं एकस्याः तादृश्याः दृष्ट्यारेवावश्यकता वर्त्तते यत् सा ज्ञानयोगेन ज्ञानमयनेत्राभ्यां जागृतो भूत्वा बोधं गृह्णीयात्। पशवः पक्षिणः प्राणिनः मानवोत्तरजीवा अपि ज्ञानसम्पन्नाः सन्ति तदर्थं शास्त्रेषु बहूनि प्रमाणानि सन्ति। स चात्र प्रतिपाद्यविषयःवत्तते। मानवः अन्यान् जीवान् प्राणीन् पशून् शिक्षयति बोधयति च तथा अस्माभिः जगति दृष्टं किन्तु इदानीमयमवसरोऽस्ति प्राणिभ्यः शिक्षाग्रहणस्य।

शास्त्रं तु तथा प्रमाणयति यत् मानवः भगवतः चान्तिमं सर्जनं विद्यते अतः परमात्मना सिसृक्षया यद्यद् सृष्टं तत्र तत्र किमपि ज्ञानं कर्म भक्तिपक्षेण स्थापितं स्यादेव। मानवस्य क्रिया सर्जनं वा प्रयोजनरहितं

कर्मशून्यं ज्ञानरहितं समयह्यापनाय स्यात् किन्तु ईश्वरः यद्यद् करोति सप्रयोजनं सप्रमाणं ज्ञानपूर्णं सार्थं च करोति।

पुराणेषु भगवतः विविधावताराणां वर्णनमागच्छति तत्र ज्ञानं भवति यत् किमर्थं प्राणिषु भगवता जन्मग्रहणं कृतं स्यात् किन्तु ईश्वरः सर्वदा तत्प्रमाणयितुं अवतरति।

मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः।

रामो रामश्च कृष्णश्च बुद्धः कल्किश्च ते दश ॥[३]

प्रमुखदशावतारेषु मत्स्यः कूर्मः वराहश्च नृसिंहादयः पशुरूपेणावताराः परमात्मना गृहीताः येन ज्ञानं भवति यत् परमात्मना तेषु तेषु जीवेषु अपि ज्ञानपक्षेण किमपि स्थापितं स्यात्। कूर्मस्य विषये यथा गीतायां चोक्तं "कूर्मोऽङ्गानीव सर्वशः"।

शरीरस्याकुञ्चने ईश्वरेण इन्द्रियदमने तस्योदाहरणं दत्तं विद्यते तेन गुणेन एव भगवता शिवेन कूर्माय स्वमन्दिरे देवालये शिवालये वा स्थानं प्रदत्तम् । तथैव पुरुषार्थस्य गुणग्रहणाय ज्ञानोपार्जनाय आसनस्थिराय भगवता शङ्करेण वृषभाय स्वमन्दिरे स्थानं दत्तम्।

पशूनां प्राणिनां मानवोत्तरजीवानां किमपि तादृशं बाहुल्यं गुणपक्षो वा स्यादेवं येन भारतीयाध्यात्मिकपरम्परायां प्रायः सर्वे देवाः येन केनापि जीवेन सम्बद्धाः वर्तन्ते। यथा शिवं पश्यामः तत्र कूर्मः वृषभः कण्ठे सर्पाः निवसन्ति नित्यं वसन्ति तथैव गणेशेन सह मूषकः सोऽपि जीवः पुरुषार्थस्य प्रतीकं वर्तते। नित्योद्योगं कृत्वा स्वजीवनं चालयति। कार्तिकेयः मयूरासने। देवी सिंहासने। विष्णुः गरुडासने। ब्रह्मा हंसासने। लक्ष्मीः शुकासने। पुनश्च श्रीविष्णोः शेषासने शयनमेतत् सर्वं किमपि प्रेरयति प्रचोदयति । पशवोऽपि मानवसमाजेन सुबद्धास्सन्ति तेषां मातृत्वं भवेन तदर्थमेव धेन्वाः मातरूपेण स्थापना कृता । तथैव

Scanned with CamScanner

परमात्मन: विविधावतारेष्वपि समये समये अन्यै: जीवै: पशुभि: अवतारकार्य सफलतया परिपूर्णं कृतं विद्यते। यथा –

रामायणे सुवर्णमृगस्य प्रसङ्ग: । वानरै: कृतं सेतुबन्धनिर्माणकार्यम् । हनुमान् सुग्रीव: अङ्गद: जाम्बुवान् नल: नीलादयश्च सर्वे रामावतारग्रहणे सहायका: समभवन्।

तथैव कृष्णावतारे विरोधभक्त्यापि बकासुर: अघासुर: धेनुकासुर: वत्सासुर: कुवलयापीड इमे अवतारकर्मणि सहायका: समभवन्।

यदा कथितं जीव: मानव: ग्लानिपूर्ण: भवति स्वभाग्येनासन्तुष्ट: भवति तदा प्रेरणादातुं बलं दातुं पूर्वजैरन्यप्राणिनां दृष्टान्तेन एकमाश्वासनं दत्तं विद्यते।

येन शुक्लीकृता: हंसा: शुकाश्च हरितीकृता: ।
मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ।।[३]

हितोपदेश: मित्रलाभ: पञ्चतन्त्रम् बृहद्कथामञ्जरी इमे ग्रन्था: एतस्य विषयस्य प्रतिपादने पूर्णतया भरिता: परिपूर्णामन्ति। विविधानां पशूनां पक्षिणां माध्यमेन नृपबालकान् अस्मान् सर्वान् च स कवि: ऋषि: विभु: प्रभुर्वा पाठयति।

सर्वेभ्य: प्राणिभ्य: मानव: शिक्षाग्रहणं ज्ञानग्रहणं करिष्यति चेत् स मुक्त: भविष्यति। कारणं "ऋते ज्ञानान्न मुक्ति:"[४]

गीतायामपि पण्डितस्य पाण्डित्यमपि तदैव सिद्धं भवति यदा स

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिता: समदर्शिन: ।।[५]

अत्र मानवेतरप्राणिषु समभावः आगच्छेत् तदर्थं एका दृष्टिर्विद्यते।

शास्त्रस्य शास्त्राणां वा एकं प्रमुखं प्रयोजनमेव तदस्ति यत् स तस्य मानवस्य दृष्ट्यां दृष्टिकोणे वा परिवर्तनमानयत्।

अजायाः दृष्टान्तेन वा इदानीं अजा शिक्षयति अस्मान् यथा –

धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते ।

अजागलस्तनस्यैव तस्य जन्म निरर्थकम् ॥[६]

अजागलस्तनस्य निरर्थकता दर्शिता तस्य अजागलस्तनस्य किमपि प्रयोजनं नास्ति वृथा वर्त्तते । किन्तु अत्र किञ्चित् सिद्धान्तः तेन दृष्टान्तेन सफलः जातः । उदाहरणं दातुं वा दानेन तस्य सार्थकता जाता । तथैव तस्मिन् तस्मिन् प्राणौ पशौ परमात्मना किमपि स्थापितमेवास्ति । नागो भाति मदेन, अश्वः जवेन हंसमिथुनेन नद्यः, तथैव –

भेको धावति तं च धावति कणिः सर्पं शिखी धावति

व्याघ्रो धावति केकिनं विधिवशाद् व्याधोऽपि तं धावति ।

स्व स्वाहारविहार साधनविधौ सर्वे जनाः व्याकुलाः

कालस्तिष्ठति पृष्ठतः कचधरः केनापि न दृश्यते ॥[७]

अत्र मानवेतरप्राणिषु समभावः आगच्छेत् तदर्थं एका दृष्टिर्विद्यते ।

अनर्घराघवानाम्नः काव्ये अस्यैकमुदाहरणं मिलति । यथा –

यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।

अपन्थानं तु गच्छन्तं सोदरोऽपि विमिञ्चति ॥[८]

सिंहस्य पराक्रमं तेन पराक्रमेण मानवेन किं गृह्णीयात् तदपि प्रोक्तं श्लोकाभ्याम् यथा –

Scanned with CamScanner

नाभिषेको न संस्कारो सिंहस्य क्रियते मृगैः ।
विक्रमार्जितसत्वस्य स्वयमेव मृगेन्द्रता ॥[९]

तथैव

एकोहमसहायोऽहं कृशोऽहमपरिच्छदः ।
स्वप्नेऽप्येवं विधा चिन्ता मृगेन्द्रस्य न जायते ॥[१०]

संस्कृताध्ययनाध्यापनपरम्परायां यदि कश्चित् गुरुः स्वछात्रान् पाठयति छात्रत्वं धारयितुं प्रेरयति तदा विद्यार्थिनः पञ्चलक्षणमवश्यं कथयति । तत्र परम्परादृष्ट्या काचित् त्रुटिः वर्त्तते इति केचन विद्वांसः कथयन्ति अतोऽत्र द्वावपि श्लोकौ प्रतिपाद्येते ।

आदौ पठितपूर्वः -

काकचेष्टा बकध्यानं श्वाननिद्रा तथैव च ।
अल्पाहारी गृहत्यागी विद्यार्थिपञ्चलक्षणम् ॥

इदानीं श्रुतपूर्वः -काकचेष्टः बकध्यानः
श्वाननिद्रस्तथैव च ।
अल्पाहारः गृहत्यागः

विद्यर्थिपञ्चलक्षणम् ॥ (विदूषां मुखम् )

तथैव श्रीमद्भागवतमहापुराणे एकादशस्कन्धे दत्तात्रेयस्य चतुर्विंशतिर्गुरूणां कथा आगच्छति तत्रापि केचन प्राणिनः पशवः सन्ति येभ्यः दत्तात्रयः गुणग्रहणं शिक्षाग्रहणं करोति तेन ज्ञानं भवति यद्तेषां ज्ञानदृष्टिः कीदृशी विशाला वर्त्तते । तथा स्वयं दत्तात्रयेणापि पशुभ्यः पठनं

Scanned with CamScanner

विहितं स्यात् तर्हि अस्माकं तु कथा ? एवं हिन्द्यामपि एकं प्रसिद्धं वाक्यं वर्त्तते यत् –

शिक्षा अगर भिक्षा में भी मिले तो ग्रहण कर लेनी चाहिए।

अतः मानवः नेत्रोद्घाट्य स्थास्यति चेत् सर्वेभ्यः किमपि बोधग्रहणं करिष्यति तदनेन लेखेन व्याख्यानेन च सिद्धं भविष्यति।

दत्तात्रेयस्य चतुर्विंशतिगुरुषु प्राणिनः के आसन् किञ्च ज्ञानोपार्जनं कृतं तदत्र ग्रन्थाधारेण यथा –

- कपोतः - अत्यन्तः स्नेहार्द्रः खगः तेन कश्चिद् हानिः न भवेत्। अतिस्नेहः त्याज्यः।
- अजगरः - यल्लभ्यते भोजने वा न लभ्यते तथापि तुष्टिः।
- पतंगः - मोहेन अग्नौ पतति तथा मोहेन न भाव्यम्।
- मधुकृद् - वृत्तिं माधुकरीं मुनिः। सारग्रहणम्। (मधुमक्षिका)
- गजः - स्पर्शासक्तः गजः भवति स च बोधयति।
- हरिणः - गीतश्रवणं कर्णलोलुपता नाधिका कार्या।
- मीनः - जिह्वारसेन स बद्धः भवति अतः रसनामोहत्याज्यः।
- कुररः - तेन त्यक्तेन भुञ्जिथाः।
- सर्पः - एकान्तप्रियः गृहमोहत्यागः अल्पभाषी।
- ऊर्णनाभिः - संसारस्य निर्माणं निर्वाणं जानाति उभयत्र गतिः।

Scanned with CamScanner

· सुपेशकृत् - यत्र यत्र मनो देही धारयेत् सफलं धिया।
(भ्रमरी) स्नेहाद् द्वेषाद् भयाद् वापि याति तत्तत्सरूपताम्॥''

इत्थमेव भागवतमहापुराणे अष्टमस्कन्धे गजग्राहमोरपि कथा आगच्छति तत्रापि प्राणिभ्यां गजग्राहुमोपि बोधग्रहम्। एवं प्रकारेण रामायण – महाभारत – पुराणोपपुराणेषु प्राणिनां कथाः मानवशिक्षणाशयैव।

पशूनां प्राणिनामभ्यासः वेदव्यासस्यापि कीयान् स्यादिति अनेन ज्ञायते। अस्माकं पौराणिकाः प्राणिभ्यः पठन्ति स्म किन्तु तेभ्यः गुणग्रहणाय अस्माभिः लज्जामनुभूयते। व्यासोच्छिष्टं जगत्सर्वं तर्हि वेदव्यासेन इत्थं प्राणिभ्य शिक्षाग्रहणं कृतं स्यात् तर्हि अस्माकं तु का कथा?

मानवः मानवात् मानवतापूर्णरीत्या शिक्षाग्रहणं करोति वा न तद् तु न जाने किन्तु "बालादपि सुभाषितं ग्राह्यं"[१२] अत्र विषये पशुभ्योऽपि गुणाः ग्राह्याः ज्ञानमर्जनीयम् इति कथनोपदेशः वर्त्तते।

अत एव विष्णुगुप्तः चाणक्यः कौटिल्यः स्वनीत्यां गुणग्राह्यविपश्चितः इति धिया अस्मान् क्रियया प्रबोधयति यत् पशवः प्राणिनः वनोपवने कानने अटव्यां वा निवसन्ति किन्तु तत्र गुणग्राह्याः सन्ति तेभ्योऽपि शिक्षाग्राह्या। एतदर्थं चाणक्यः स्वनीतौ कथयति यत् –

सिंहादेकं बकादेकं शिक्षेच्चत्वारि कुक्कुटात्।
**वायसात् पञ्च शिक्षेच्च षट्शुनस्त्रीणिगर्दभात्॥**[१३]

अत्र अस्माकं पशोः कः गुणः किञ्च ज्ञानं ग्राह्यं तदर्थं ते स्वतः पशूनां दीर्घाभ्यासेन ध्यानेन तेषामध्ययनं कृत्वा श्लोकैश्च प्रोक्तं विद्यते। तद्यथा आदौ सिंहात् किं ज्ञानं कश्च गुणः?

Scanned with CamScanner

प्रभूतं कार्यमल्पं वा यन्नर: कर्तुमिच्छति ।

सर्वारम्भेण तत्कार्यं सिंहादेकं प्रचक्षते ॥[१४]

कार्यं यादृशं तादृशं भवतु किन्तु यदि कर्तव्यमेवास्ति चेत् निष्ठया शौर्येण शतप्रतिशत् दत्वा करणीयमिति सिंहात् शिक्षा प्राप्तव्या।

इदानीं बकादेकं किं ग्राह्यं तर्हि कथयति यथा –

इन्द्रियाणि च संयम्य बकवत्पण्डितो नर: ।

देशकालबलं ज्ञात्वा सर्वकार्याणि साधयेत् ॥[१५]

जितेन्द्रियत्वेन भाव्यं कार्यं यथाकथमपि साधनीयमिति बहुगुण: बकज्ञानम् इति।

इदानीं के चत्वार: गुणा: कुकुटात् ग्राह्या तर्हि –

प्रत्युत्थानं च युद्धं च संविभागं च बन्धुषु ।

स्वयमाक्रम्य भोगं च शिक्षेच्चत्वारि कुक्कुटात् ॥[१६]

कुक्कुटे परमात्मना प्रमुखतया चत्वार: गुणा: संस्थापिता: ते मानवेन ग्राह्या: इति आशय:।

काकात् वायसाद्वा पञ्च गुणा: ग्राह्या: । ते च यथा –

गूढं च मैथुनं धार्ष्ट्यं काले चालयसंग्रहम् ।

अप्रमादमविश्वासं पञ्च शिक्षेच्च वायसात् ॥[१७]

मानवसमाजे मानवेषु एक काक: प्रतिवसति किन्तु भाद्रपदमासं विहाय न कदापि मानवेन तस्य स्मरणं क्रियते । स: काक: गुणान्वित: वर्त्तते यद् चाणक्य स्मारयति । ग्रामेषु जना: कथयन्ति यत् गृहशिखरे वायस: वदति चेत् अतिथीनामागमनं सूच्यते अत: स: दीर्घदर्शी अस्ति तदपि कथ्यते।

Scanned with CamScanner

षट्गुणाः कुक्कुरात् ग्राह्याः ते च के ? यथा –

बह्वाशी स्वल्पसंतुष्टः सुनिद्रो लघुचेतनः ।

स्वामी भक्तश्च शूरश्च षडेते श्वानतो गुणाः ॥[१८]

जनेषु तस्य प्रामाणिकतायाः बहु प्रचारः वर्त्तते यत् यः तं भोजयति तं प्रति तस्य अत्यादरः भवति तं प्रति स निष्ठया वसति कुक्कुरः तादृशः वर्त्तते यं दिनत्रयं भोजनं दीयते चेत् सः त्रिवर्षाणि यावत् तन्न विस्मरति। मानवाय वर्षत्रयं भोजनं दीयते चेत् दिनत्रयमपि कदाचित् न स्मरति।

त्रयः गुणाः गर्दभेभ्यः ग्राह्या ते च यथा –

सुश्रान्तोऽपि वहेद्भारं शीतोष्णं न च पश्यति ।

यस्तु सञ्चरते नित्यं त्रीणि शिक्षेच्च गर्दभात् ॥[१९]

शास्त्रेण मानवेन संतोषस्य केवलं चर्चा क्रियते अपि तु गर्दभेण शास्त्रं नाधीतं तथापि क्रियया व्यवहारेण संतोषः शब्दः मानवेभ्यः पाठयति। एतादृशमेव पाणिनीयशिक्षायां ह्रस्वदीर्घप्लुतानाम् अभ्यासाय छात्रेभ्यः कथितं यत् पक्षीणामभ्यासं करोतु कश्चित् पक्षिः ह्रस्वमेव वदति कश्चित् खगः दीर्घं वदति कश्चित् विहगः प्लुतं वदति तद्यथा –

चाषस्तु वदते मात्रां द्विमात्रां वायसोऽब्रवीत् ।

त्रिमात्रस्तु शिखिज्ञेयो एकमात्र परिग्रहः ॥[२०]

(व्यञ्जनं चार्धमात्रकम्)

तथैव व्याकरणज्ञः शब्दान् कथं प्रयोजयति वा तेन वर्णानां प्रयोगः कयारीत्या करणीयः तदर्थं पुनः व्याघ्रीमाध्यमेन पशुना तदपि शिक्ष्यते तद्यथा –

Scanned with CamScanner

व्याघ्री हरेत् यथा पुत्रान् दंष्ट्राभ्यां न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥[२१]

यदा कश्चित् मानवः प्रयत्नान् कृत्वा श्रान्तः भवति तदा तस्मै मार्जारस्यैकमुदाहरणं प्रदीयते यत् –

प्रयत्नः खलु कर्तव्यः फलं मार्जारवत् भवेत् ।
जन्मप्रभृति गौर्नास्ति पयः पिबति नित्यशः ॥

कस्यचिद् मानवस्य केनचिद् मानवेन सह मैत्री भवति तत्रापि उदाहरणाय कथयति यथा –

मृगा मृगैः सङ्गमनुव्रजन्ति गावश्च गोभिस्तुरङ्गास्तुरङ्गैः ।
मूर्खाश्च मूर्खैः सुधियः सुधिभिः समानशीलव्यसनेषु सख्यम् ॥[२२]

सख्यं तयोरेव भवति ययोर्दुःखं व्यसनं रसः समानं समानो वा भवति ।

मानवेन स्वजीवने दयादक्षिण्यादिगुणाः सेवनीयाः । दीर्घजीवनेन न कोऽपि लाभ अपि दिव्यजीवनेन लाभः तदर्थं काकस्य वायसस्योदाहरणेन पाठयति । तद्यथा –

यो नात्मजे न च गुरौ न च बन्धुवर्गे
दीने दयां न कुरुते न च भृत्यवर्गे ।
किं तस्य जीवितफलं हि मनुष्यलोके
काकोऽपि जीवति चिराय बलिं च भुङ्क्ते ॥[२३]

"काकः पद्मवने रतिं न कुरुते हंसो न कूपोदके" उदाहरणेऽस्मिन्नपि मूर्खसज्जनयोः प्रकृतिं कथयति । "या यस्य ... ...े"॥[२४]

तथैव कश्चिद् एक: सहृदय: स्नेहार्द्रहृदय: जीव: भवति स: स्वजीवने येन यथा सुबद्धो भवति पश्चाद् अन्याश्रयं न करोति । एकस्याश्रम: स्वीकृत: चेत् आद्योपान्तं जीवनं यावत् तस्यैवाश्रयेण भाव्यं तस्य सर्वश्रेष्ठं हृदयस्पर्शमुदाहरणं चातकपक्षि: वर्तते यथा –

सन्ति कूपा:स्फुरद् रूपा: सागरा: सरितस्तथा ।

तथापि चातकाधारो फलदो जलदोदय: ॥[२५]

सागर: कूपा: सरिता: सर्वे चातकाय कथयन्ति अस्मासु जलं विद्यते तेन त्वं तृषानिवृत्तो भव यदि न जलं स्वीकरिष्यसि चेत् सागर: कथयति स घन: मत्त: जलं स्वीकृत्यैव तुभ्यं ददाति अत: त्वं साक्षादित एव स्वीकुरु नान्यथा क्रुद्धो भूत्वा अहं समुद्र: जलप्रलयं करिष्यामि तदा किं करिष्यसि ? तदा चातक: कथयति भवतु पयोद: त्वत् जलं स्वीकरोति भवतु अहं तृषार्त: मम तु आश्रयस्थानं स्नेहार्द्रस्थानं तृषानिवृत्तकं स्थानं जन्म जन्मनि तु अम्भोद एव भविष्यति । अन्याश्रयं न करिष्ये ।

कर्मण: गति: विषये गवा बोध: प्राप्यते यथा –

**यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।**

**तथा पूर्वकृतं कर्म कर्तारमनुच्छति ॥[२६]**

सज्जनदूर्जनयो: विषये पुन: हंसबकयो: माध्यमेन स्वशास्त्रं कथयति यथा –

एकेन राजहंसेन या शोभा सरसो भवेत् ।

**न सा बकसहस्रेण परितस्तीरवासिना ॥[२७]**

पात्रापात्रयो: विषये गुण: पुन: धेनुपन्नगयो: माध्यमेन मानव: पाठ्यते तद्यथा –

Scanned with CamScanner

पात्रापात्रविवेकोऽस्ति धेनुपन्नगयोरिव ।
तृणात्सञ्जायते क्षीरं क्षीरात्सञ्जायते विषम् ॥[२८]

दुर्जन: अल्पवैभवेन गर्वं प्राप्नोति सज्जन: सम्पन्नो भवति चेदपि गर्वान्वित: न भवति तदर्थं यथा –

विषभारसहस्त्रेण गर्वं नाऽऽयाति वासुकि: ।
वृश्चिको बिन्दुमात्रेण ऊर्ध्वं वहति कुगुकम् ॥[२९]

तथैव सिंहवत् शिक्षां दातुं ज्ञानं दातुं कथ्यते –

मृगै: नष्टं शशै: लीनं वराहै: चलितं स्थलात् ।
गजानां गमनं दृष्ट्वा सिंहै: पूर्ववदासितम् ॥[३०]

समाजे कश्चित् दुर्बल: भवति तस्योपरि बहु प्रहारा: भवन्ति तेन यदि कदाचित् स: खिन्न: भवति तदा अजया तस्य नैराश्यं निवार्यते । तद्यथा –

अश्वं नैव गजं नैव व्याघ्रं नैव च नैव च ।
अजापुत्रं बलिं दद्यात् दैवो दुर्बल: घातक: ॥[३१]

मानवस्य प्रेरणा स्त्रोतांसि पशव: खगा अपि सन्ति । यदि कश्चिद् ज्ञाता विद्वान् सरस्वत्या: समुपासक: स्यात् विद्योपासना सद्विद्योपासना कृतास्ति चेत् तेन उदरपूर्त्यै न कदापि चिन्ता कार्या तस्योदाहरणं शुकेऽस्ति ।

सद्विद्या यदि का चिन्ता वराकोदरपूरणे ।
शुकोऽप्यसनमाप्नोति राम रामेति च ब्रूवन् ॥[३२]

तथैव महाभारते पञ्जरस्थयो: शुकयो: एका कथा आगच्छति एक: शुक: कस्यचिद् विदुष: वेदज्ञस्य ब्राह्मणस्य गृहे वर्त्तते तथैवापर:

विभिन्नवातावरणेन शुकः कस्यचिद् दूर्जनस्य मूर्खस्य गृहे वर्तते प्रतिदिनं विभिन्नवातावरणेन तयोः स्थितिः कीदृशी भवति वेदज्ञस्य गृहस्थः शुकः कालक्रमे मन्त्रान् वदति तथैव मूर्खाग्रे स्थितः अपशब्दान् वदति । संसर्गजाः दोषगुणाः भवन्ति। प्रसिद्धं वाक्यं विद्यते।

रामायणेऽपि सीतारामयोः एकान्तसेवने एकस्य काकस्य प्रसङ्गः इत्थमेवास्ति येन अग्रे क्रुद्धः रामः दर्भेण ब्रह्मास्त्रमनुसन्धानि तथा एका चक्षुः च क्षीणा भवति । प्रभोः प्रणयलीलायां कश्चिद् बाधकः भविष्यति चेत् तस्य हानिः भविष्यति।म्

उपसंहारः-

इत्थं मानवजीवनमपि पशुभिः सुशोभितं भवितुं शक्यते । मानवाः पशून् पालयन्ति किन्तु तेभ्यः शिक्षाग्रहणं बोधग्रहणं न कुर्वन्ति। परमात्मना तेषु अपि गुणाः संस्थापिताः वर्त्तन्ते।

"गुणग्राह्या विपश्चितः" विद्वासः सर्वेभ्यः स्थानेभ्यः जीवेभ्यः पशुभ्यो वा गुणग्रहणं कुर्वन्ति। पशुषु मानवेषु का साम्यता का विचित्रता का विशिष्टता का विलक्षणता तद् सर्वं शास्त्राणां सेवनेन अभ्यासेन ज्ञायते । यथा नीतिशतके राजर्षि भर्तृहरिणा प्रोक्तं यत् –

**येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।**

**ते मृत्युलोके भुवि भारभूताः मनुष्यरूपेण मृगाश्चरन्ति ।।**

मानवे गुणाः न विलसन्ति चेत् सः पशुतुल्यः किन्तु अत्र तु कथनाशयः गुणानां पार्थक्यं पृथकत्वं स्यात् किन्तु गुणास्तु परमात्मना सर्वत्र सर्वप्राणिषु संस्थापितास्सन्ति।

सर्वेषां जीवानां धर्मः पृथक् भवति किन्तु सनातनधर्मस्य परिपालने रक्षणे तु सः मनुष्यः एव श्रेष्ठतमः विद्यते नान्यथा तत्र सः

Scanned with CamScanner

पशुतुल्यः भवति। यथा पुनः भर्तृहरिः

आहारनिद्राभयमैथुनश्च सामान्यमेतत् पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ॥[33]

इत्थं शास्त्राणां प्रयोजनमेव तदस्ति यत् परमात्मना यत्कलेवरं प्रदत्तं तेन इहामुष्मिकं श्रेयः प्रेयः भवेत् तथा मानवेन जीवनं ह्यापनीयम्। शास्त्राणां मेवनेनाभ्यामेनैव मानवः भवति नान्यथा पशुः । दृष्टिकोणपरिवर्तनस्यैव प्रयोजनं शास्त्राणां भवति।

मतयो यत्र गच्छन्ति तत्र गच्छन्ति वा नराः।
शास्त्राणि यत्र गच्छन्ति तत्र गच्छन्ति वै नराः ॥[34]

मानवः शिष्टात् विशिष्टो भवेत् स एवाशयः विद्यते मम शास्त्राणां च।

॥ इति शम् ॥

सन्दर्भाः-

(१) मार्कण्डेयपुराणां ७९/७३
(२) पुराणविमर्शः
(३) हितोपदेशः।
(४) उपनिषद् सुधा
(५) गिता ५/१८
(६) हितोपदेशः।
(७) पञ्चतन्त्रः
(८) अनर्घराघवम्

(११) भा. पु. ११-७-८-९

(१२) हितोपदेशः

(१३) चा. नी, अ.-६ श्लोक - १४

(१४) चा. नी. अ.-६ श्लोक - १५

(१५) चा. नी. अ.-६ श्लोक - १६

(१६) चा. नी..अ.-६ श्लोक – १८

(१७) चा.. नी. अ.-६ श्लोक - १९

(१८) चा. नी. अ.-६ श्लोक - २०

(१९) चा. नी..अ.-६ श्लोक - १७

(२०) पा. शि. स

(२१) पा. शि.

(२२) सूक्तिकर्णामृतम्

(२३) सु. र. भा.

(२४) बृहत्कथामञ्जरी

(२५) अन्योक्तिसंग्रह

(२६) वि. पु.

(२७) जगन्नाथग्रन्थावलि

(२८) सु. र. भा.

(२९) अन्योक्तिसंग्रहः

(३०) जगन्नाथः

(३१) शाम्भ्रमिंहावलोकन

(३२) सु. र. भा.

(३३) नीतिशतकम्

(३४) सु. र. भा.

सन्दर्भग्रन्थाः

(१) श्रीमद्भगवद्गीता ।

(२) श्रीमद्भागवतमहापुराणम् ।

(३) पाणिनीय शिक्षा ।

(४) नीतिशतकम् ।

(५) चाणक्यनीतिः ।

(६) हितोपदेशः ।

(७) पञ्चतन्त्रम् ।

(८) बृहद्कथामञ्जरी ।

(९) महाभारतम् ।

(१०) रामायणम् (वाल्मिकीय) ।

(११) मदुक्तिकर्णामृतम् ।

(१२) सुभाषितपुष्पमाला ।

(१३) विष्णुपुराणम् ।

(१४) उपनिषद् सुधा ।

(१५) शास्त्रसिंहावलोकनम् ।

(१६) प्राणिकथासंग्रहः ।

Scanned with CamScanner